## क्विन्प्रत्ययस्य कुः । (६२/३७७)

[1]पदस्य (८.१.१६/४०१) इति वर्तते । [2]क्विन्प्रत्ययस्य सर्वत्र पदान्ते कुत्वम् इष्यते । क्विन् प्रत्ययो यस्माद् [3]धातोः स[4] क्विन्प्रत्ययः, तस्य पदस्यालोऽन्त्यस्य [5]कवर्गादेशो भवति । 'स्पृशोऽनुदके क्विन्' (३.२.५८/४३२) । घृतस्पृक् । [6]हलस्पृक् । मन्त्रस्पृक् । क्विनः कुः इति वक्तव्ये प्रत्ययग्रहणं [7]कृतं (म. भा. ३.४११) बहुव्रीहि[8]विज्ञानार्थम् । [9]क्विन् प्रत्ययो यस्माद् विहितस्तस्मादन्य[10]स्मिन्नपि प्रत्यये[11] कुत्वं यथा स्यात् । मा नो अस्राक् । मा नो अद्राक् । सृजिदृशिभ्यां हि क्विन् विहितः, तयोर्लुङि [12]कुत्वमेतत् । माङ्योगेऽपि छान्दसत्वादडागमः । ईट् च न भवति, 'बहुलं छन्दसि' (७.३.९७/३५८६) इति । तथा [13]दृग्भ्याम्, दृग्भिः इति क्विबन्तस्यापि दृशेः कुत्वं भवति । एवं [14]च सति रज्जुसृड्भ्याम् इत्यत्रापि [15]कुत्वं प्राप्नोति । अथ [16]तु नेष्यते, प्रतिविधानं कर्तव्यम् इति ॥

## नशेर्वा । (६३/४३१)

[17]पदस्य इति वर्तते । नशेः पदस्य वा कवर्गादेशो भवति । सा वै जीवनगाहुतिः । 'सा वै जीवनडाहुतिः' (मै. १.४.१३) । नशेरयं सम्पदादित्वाद् भावे क्विप् । जीवस्य नाशो जीवनक्, जीवनट् । षत्वे प्राप्ते कुत्वविकल्पः ॥

## मो नो धातोः । (६४/३४१)

मकारान्तस्य धातोः पदस्य नकारादेशो भवति । प्रशान् । प्रतान् । प्रदान् । [18]शमितमिदमादीनां क्विप्, 'अनुनासिकस्य क्विझलोः क्ङिति' (६.४.१५/२६६६) इति दीर्घत्वम् । नत्वस्यासिद्धत्वान्नलोपो न भवति । मः इति किम् ? भित् । छित् । धातोः इति किम् ? इदम् । किम् । पदस्य इत्येव, प्रतामौ । प्रतामः ॥

## म्वोश्च । (६५/२३०९)

मकारवकारयोश्च परतः मकारान्तस्य धातोः नकारादेशो भवति । 'अगन्म तमसः पारम्' । (वा. सं. १२.७३) । [19]अगन्व । गमेर्लुङि 'बहुलं छन्दसि' (२.४.७३/३४००) इति शपो लुक् । [20]जगन्वान् । 'विभाषा गमहनजनविदविशाम्' (७.२.६८/३०९९) इति क्वसौ इडागमस्याभावः । अपदान्तार्थः आरम्भः ॥

---

1. इमे द्वे वाक्ये न स्तः ह. 2. वाक्यमिदं नास्ति क. 3. धातोः नास्ति ह. 4. धातुः इत्यधिकम् इ. क. 5. स्थाने इत्यधिकम् इ. 6. जलस्पृक् इ, दलस्पृक्, मधुस्पृक् ड. ब. 7. कृतं नास्ति इ. 8. विज्ञापनार्थं ह. 9. क्विन्प्रत्ययस्य सर्वत्र पदान्ते कुत्वमिष्यते क्विनः क्विः इति विज्ञानार्थम् ह. 10 परस्मिन्नपि क. 11. पदान्तस्य क. इ. 12. रूपम् ब. ड, कुत्वे रूपमेतत् ह. 13. देवदृग्भ्याम् देवदृग्भिः ड. 14. तु क. 15. कुत्वेन भवितव्यम् ब. 16. अत्र क, अन्यत्र इ. 17. वाक्यमिदं नास्ति ह. ब. 18. इमे द्वे वाक्ये न स्तः ब. इ. ड. 19. अगन्व तमसः पारम् ब. 20. वकारे इत्यधिकम् ह.